## न भकुर्छुराम्। (७९/१६३०)

रेफवकारान्तस्य भस्य कुर् छुर् इत्येतयोश्च दीर्घो न भवति। [1]धुरं वहति धुर्यः। [2]धुरि साधुः धुर्यः। [3]दिव्यम्। कुर् – कुर्यात्। छुर् – छुर्यात्। [4]रेफवकाराभ्यां [5]भविशेषणं किम्? प्रतिदीव्ना। [6]प्रतिदीव्ने॥

## अदसोऽसेर्दादु दो मः। (८०/४९९)

अदसोऽसकारान्तस्य [7]वर्णस्य दात् परस्य उवर्णादेशो भवति, दकारस्य च मकारः। अमुम्, अमू, अमून्। अमुना, अमूभ्याम्। 'भाव्यमानेनाप्यु[8]कारेण सवर्णानां ग्रहणमिष्यते' (पु.प. २१) इति [9]एकमात्रिकस्य मात्रिकः, द्विमात्रिकस्य द्विमात्रिकः आदेशो भवति। असेः इति किम्? अदः इच्छति अदस्यति।

[९२७] अदसोऽनोस्त्रे इति वक्तव्यम्। (म.भा. ३.४१४)

ओकाररेफयोरपि प्रतिषेधो यथा स्यात् इति। अदोऽत्र। [10]अदः। [11]तदर्थं केचित् [12]सूत्रं वर्णयन्ति, अः सेः यस्य सोऽयम् असिः, यत्र [13]सकारस्य अकारः [14]क्रियते इति, तेन [15]त्यदाद्यत्वविधाने एतदन्यत्र न भवितव्यम् एव इति। अद्र्यादेशे कथम्?

अदसोऽद्रेः पृथङ्ग मुत्वं केचिदिच्छन्ति लत्ववत्।
केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते॥ (म.भा. ३.४१४)

इति। यैः असेः इति सकारस्य प्रतिषेधः क्रियते, [16]'अनन्त्यविकारे [17]अन्त्यसदेशस्य' (व्या.प. ६३) इति च परिभाषा नाश्रीयते, तेषामुभयोरपि मुत्वेन भवितव्यम्, अमुमुयङ्, अमुमुयञ्चौ, अमुमुयञ्चः इति, यथा चलीक्लृप्यते इति लत्वम्। ये तु परिभाषामाश्रयन्ति तेषामन्त्यसदेशस्य एव भवितव्यम्, अदमुयङ्, अदमुयञ्चौ, अदमुयञ्चः इति। येषां तु त्यदाद्यत्वविषय एव मुत्वेन भवितव्यम् इति दर्शनम्, तेषामत्र [18]न भवितव्यम्, अदद्र्यङ्, अदद्र्यञ्चौ, अदद्र्यञ्चः इति। दात् इति किम्? अलोऽन्त्यस्य मा भूत्, अमुया। अमुयोः॥

## एत ईद् बहुवचने। (८१/४३८)

अदसो दकारादुत्तरस्य एकारस्य ईकारादेशो भवति, दकारस्य च मकारः, बहुवचने [19]बहूनामर्थानामुक्तौ। अमी। अमीभिः। अमीभ्यः। अमीषाम्। अमीषु। बहुवचने इत्यर्थनिर्देशोऽयम्, [20]पारिभाषिकस्य हि [21]बहुवचनस्य ग्रहणे अमी इत्यत्र न स्यात्॥

---

1. धुरं वहति नास्ति ह. 2. उदाहरणमिदं नास्ति इ.क. 3. नास्ति ड. 4. रेफवकारान्तस्य क. 5. भस्य इ, तस्य ह. 6. नास्ति फ.ब. 7. वर्णमात्रस्य ततः परस्य दकारात् परस्य वर्णस्य ह. 8. अकारेण इ. 9. मात्रिकस्य क.इ. 10. अदः कुलम् क.इ.ह. 11. अतः इ. 12. सूत्रं नास्ति इ. 13. सकारमात्रस्य इ. 14. कृतः इ. 15. त्यदाद्यत्वाभावे सर्वत्र न भवितव्यम् क. इ. 16. तैः इत्यधिकम् क. इ. 17. अन्तस्यैव भवितव्यम् इति परिभाषा क. 18. नैव क. 19. बहूनामर्थानामुक्तौ नास्ति इ. 20. परिभाषितस्य ह. 21. बहुवचने गृह्यमाणे इ.क.ब.